६४॥ ब्रह्मचारीननः कुर्यात्सायंसंध्या विधीयते। अग्निकार्यं तथा होमं पश्चिमन्नग्नौ विधीय
ते ॥६५॥ नो चेत्स्यात्सर्ववत्कुर्यादाचार्यस्थंडिलादिकं। पूर्णपात्रनिधानांतमनलस्थापना
दिकं ॥६६॥ नैर्वपेन्मातृतः प्राप्तां…ळांसहसस्येते। सवितश्च ततस्तु द्वीमहऋषीणामंत
तः क्रमात् ॥६७॥ अपायिचोदनं कुर्याद्धारां नऊ ने इथ। इदसस्पतिमंत्रेण गायत्र्येऽस्मि
चिघस्तथा ॥६८॥ चर्वाहुतित्रयं कुर्यात्स्विष्टकृदादिकं ॥ भोजयित्वा द्विजान्वेद समाप्ति
रस्वथो चरेत् ॥६९॥ निर्विघ्नेन त्रिवारं तु पितास्य ब्रह्मचारिणः ॥ वसेदतो त्रिरात्रं च क्षाराद्वि
नमाचरेत् ॥७०॥ प्रातः संध्यामुपास्याग्निकार्यं कृत्वा परेहनि। मध्याह्नस्याचरेत्संध्यां

॥२२॥

श्री

नयज्ञादनंतरं ॥७१॥ उपाकरणपर्यंतं सावित्र्या ब्रह्मयज्ञकं । ततोग्निमीळ इत्यादीं जपेद्दान्त्वोंद्विजः ॥
७२॥ चतुर्थदिवसे कुर्यान्मेधाजननकं च हि । संध्यादिकं विधायाथ गच्छेत्पालाशसन्निधौ ॥७३॥ कलशं
स्थापयेत्तस्य च तुष्कोणेषु चैव हि । पलाशं पूजयेत्तत्र वसंतं च यथाविधि ॥७४॥ अहं मे घौ च वेप
सां पूजये स्वाहापयेत्सचा । गंधपुष्पाक्षतैश्चैव धूपदीपादिभिस्तथा ॥७५॥ प्रदक्षिणं त्रयं कुर्याद्धा
र्यः सुश्रवः पठन् । निनयेज्जलधारां च सहैव ब्रह्मचारिणा ॥७६॥ मेखलामजिनं दंडं वस्त्रं यज्ञो
पवीतकं । एकैकं धारयेन्नग्नरूपेण वत्सलेद्धा ॥७७॥ आचार्याय च तद्द्याद्वाससी ब्रह्मचारि तथा ॥ नवं
चैवात्र कुर्यात्तं धारयेत्पुनरेव हि ॥७८॥ विप्रेभ्यः कलशान्दद्यात्पुष्पीयादौ भुषोबन्दुः । पथा चारंत
था कुर्याद्दैवकोत्थापनं च हि ॥७९॥ इत्याश्वलायनीये धर्मशास्त्रे उपनयनं नाम अष्टमोऽध्यायः ॥८
इत्युपनयनादि ॥ अथ महानाम्नीव्रतं ॥ महानाम्नीव्रतं कुर्यात्पूर्णे वर्षे चोत्तरायणे । शुक्लपक्षे शुभे स्या
दुपनयनवच्चहि ॥८०॥ महाव्रतं द्वितीये तु स्यादवत्तसर्ववच्च हि । संपूर्णे तृतीये वा [illegible] थेवोपनिषद्व्रतं ।
८१॥ मासे पूर्णे थवा कुर्यात्क्रमाच्चैतद्व्रतत्रयं । कुर्यात्सरिद्दशाम्यं तु उपनायने होमवत् ॥८२॥

४ स्ना
४ घ
॥२३॥

चर्वाज्यतिलपंचात्र जुहुयात्तिलसंयुतं । अनुप्रवचनीयो नात्र देवता चात्र तास्मृता ॥ ८३ ॥ महानाम्नीव्रतस्या
होति सावित्र्या स्वाहानुष्यते । महाव्रताय चाथोपनिषदे तत्र तत्र तु ॥ ८४ ॥ वस्त्रादीनि नवान्यत्र स्वा
ज्याज्जीरथ । चर्वाज्यतित्रयं हुत्वा मौंजीदंडं च धारयेत् ॥ ८५ ॥ ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् ।
निहामेवन्नथोत्तरस्यारणं जपेद्ध ॥ ८६ ॥ नत्वा गुरूं यथाशक्त्यमीश्वयेद्ब्रह्मचार्यथा उक्त्वा चार्येमधीहीतिस्ति
जयेद्धुक्ति... द्विजान् ॥ ८७ ॥ इत्याश्वलायनीये धर्मशास्त्रे महानाम्नीव्रतत्रयं नाम नवमः ॥ अथोपा
कर्म ॥ श्रावणस्योपाकर्म हस्ते वा श्रवणस्य तु नो इ पदे वापि कुर्याद्विप्रो गुरुः सह ॥ ८८ ॥ ग्रहदोषादु
पाकर्म प्रथमं न भवेद्यदि । उक्तकालेऽथवा पाठं कुर्यात्छर्द्दिवापि च ॥ ८९ ॥ अकाले नैव तत्कुर्यादुपा
कर्म कथंचन । अकृत्वा नोद्वहेत्कन्यां मोहाच्चेत्पतितो भवेत् ॥ ९० ॥ अनारंभोक्तकाले तु वैदिकान्यां
यदुद्वहेत् । अनेन ब्रह्मचारि स्यात्सर्वकर्मबहिःष्कृतः ॥ ९१ ॥ स्नात्वा नित्यक्रियां कुर्यात् ऋषींश्चै
व समर्चयेत् । उपाकर्मणि चोत्सर्गे गौतमादींश्च सप्त वै ॥ ९२ ॥ आज्यस्य चरुपर्यंतमुपले
पादिपूर्ववत् । सक्तुं स्तेनाथ संस्कुर्यात्स्थालिस्थान्दधिसंयुतान् ॥ ९३ ॥ त्रिः प्रोक्ष्य स्थाप

त ४
॥२३॥

ॐ २

येत्स्थलीं वर्हिष्या ज्यस्य दक्षिणे। कुर्यादग्निमलंकृत्य चक्षुषी तं च पूर्ववत्॥९४॥ सावित्र्यादिऋग्भिराज्येन जुहु-
याद्वाहुतीरथ॥ अग्निमीळे या दितिर्मंत्रैर्ऋषि सक्तं जुहोत्यथ॥ केचिद्यज्ञोपवीतस्य होममिच्छंति चा-
त्र तु। उत्सर्गो प्येवमेव स्याद्बुद्धचा नाम यथाविधिः॥९६॥ ततः शिष्टकृतं हुत्वा हविस्सन्नु स्विरेव चा। ब्राह्म-
ये दद्यात् स्वरं स्यु गुरुः शिष्याः क्षमा चमेत्॥९७॥ दानं यज्ञोपवीतस्य धारणं च विधीयते। ब्रह्मचारी
वै मौंजी धारयेदजिनादिकं॥९८॥ निक्षिप्याप्सु समावेतु ताभिर्मार्जनमुच्यते। प्रणवेनैव सा-
र्व कुर्युस्ते तर्पणाय:॥९९॥ विधिनानेन तोब्रूपाद्य होवौ भूर्भुवस्वः सो। त्रिवारं चैव सावित्रीं पा-
इन धर्म्म च क्रमात्॥१००॥ अग्निमीळे दंस्तत्वाच येद्ब्रह्मचारिणा। क्रमेण संहितारण्य ब्राह्मण-
गानि च यथाक्रमं। अध्यापयित्वा रुद्रादि होममन्त्रोषं समाप-
सत्त्वमेव च॥१॥ याज्जुषं साम चाथर्वमिं स्वाध्याये ब्रह्मचारिणं। अत आरभ्य षण्मासं गुरुसेवारतं च हि।
येत्॥२॥ ततश्चाप्यास येद्वेदं यथा स्क्रत्य कृ मार्गतः। हृज र्थे विहितं बेन नियमेन च षण्मासम्यग्व-
३॥ उपनीतो ध्यसेद्वेदं यथा शक्त्यु क्रमार्गतः। अथोत्सर्जनं। उत्सर्गं चाद्विजः कुर्यात्षण्मासदूर्ध्वमादितः।
दादिकमेव च॥४॥ इत्युपाकर्म्म॥ अथोत्सर्जनं॥

॥२४॥

दृढार्थं विहितं चैव द्वेधीतानां च छंदसां [illegible] उपलेपादि कृत्वाग्न्योत्पवनावधि॥ संस्कृत्य सक्तुवस्त्रा
न्ने चक्षुष्यं तं च पर्ववत्॥६॥ दर्शाचाज्याहुतीर्हुत्वा सक्तुस्थाने कृते चरुं॥ हुत्वा स्विष्टकृतं चैकमवगा
द्य यथाविधिं॥७॥ कर्मोत्सर्गे श्रवेस्सर्वमुपाकरणवच्च हि॥ प्रतिवर्षं द्विजैः कार्यं प्राशनं मार्जनं
विना॥८॥ तर्पयेद्देवता श्रौता सावित्र्यादीर्यथाक्रमं॥ अत्रचैव हि सर्वेपि ब्रह्मयज्ञांगदेवताः॥९॥ उपा
कृत्य याज्ञ्यागादीन्होममन्त्रशेषं समापयेत्॥ विशेषं चाङ्गराचार्याः केचिद्यज्ञविदोत्र तु॥१०॥ उपा
कर्मणि चोत्सर्गे पुनश्चापि यथाविधिः॥ नैत्यकं तर्पणं कुर्याद्ब्रह्मयज्ञपुरःसरं॥११॥ इत्या
श्वलायनीये धर्मशास्त्रे उपाकर्मोत्सर्जनं नाम दशमः॥ अथ गोदानं॥ गोदानं षोडशोऽ
ब्दे वर्षे कुर्यात्तु दशगायने। केचिद्विवाहकाले वा शुभे मासि वदंति हि॥१२॥ कृत्वाभ्युदयिकं
श्राद्धमुपलेपादिपूर्ववत्॥ निधायोपरि समिधं मन्वाधानादिकं च हि॥१३॥ चौलकृत्याग्नी
र्त्या चौलवच्छ्मश्रुवापनं। स्नापयेद्वाससी दद्याद्युवे वस्त्राणि मन्त्रतः॥१४॥ अंजनं कुंडला
दीनि दंडतानि च धारयेत्॥ आयुष्यमिति वै सूक्तं पठन्गाच्छेदि वा लयं॥१५॥ स्पृष्ट्वा पा

॥२४॥

५

दीन मस्कुर्यागुर्देरो लेपसितंफळंान नक्रमिति वानुज्ञां लब्धातेनयथोदितं ॥१६॥ समावृत्तस्यवैमौंजीहोमांते

चैवब्रह्मचः ॥ उद्‍गन्मंमुमुग्धीतिमंत्रेणानेनमोचमेत् ॥१७॥ इत्यास्वल्लायनीयेधर्मशास्त्रेगोदानादित्रयंनाे

मैकादशाः ॥ सर्वेषामाश्रमाणाचगृहस्थाश्रमउत्तमः ॥ तमेवाश्रित्यजीवंतिसर्वेचैवाश्रमाइह ॥१८॥ कुलजांसु

मुखींस्वांगींसुनासांचमनोहरां ॥ सुनेत्रांसुसुभगांकन्यांनिरीक्ष्यवरयेद्बुधः ॥ अनन्यपूर्विकांकांतांमसमानां

र्षयवीयसीं ॥ आरोगिणींभ्रातृमतींकन्यातांवरयेद्बुधः ॥२०॥ असमानार्षगोत्रजेनगोत्रप्रवरवर्जनां ॥ यद्यच्य

ते ततोवक्ष्येविवाहेतस्यनिर्णयं ॥२१॥ भृग्वंगिरःकश्यपोत्रिर्वसिष्ठागस्त्यगाधिजाः ॥ सप्तब्रह्मर्षयस्ते

ष्वोगणाष्टादशाधाप्रवेल ॥२२॥ जामदग्न्यावीतहव्यास्तथागार्त्समदास्मृताः ॥ वाध्रश्र्वाश्चैववैन्या

श्चगौतमास्तदनंतरं ॥२३॥ भरद्वाजाश्चकपिमोहरिताःकण्वसंज्ञिकाः ॥ पुविरूपामुद्गलौचिष्णुवृद्धाश्च

त्रयएवच ॥२४॥ विश्वामित्राःकश्यपाश्चवसिष्ठाश्चाप्यगस्त्यः ॥ एतेचाप्यष्टदशगणामुनिभिःप्र

त्रिपादिताः ॥२५॥ भृगोः पंचगणाःपूर्वमष्टावंगिरसोगणाः ॥ अन्येत्वेकेकगणिनइत्यष्टादशात

गणाः ॥२६॥ जामदग्न्याथवीतहव्यातथागार्त्समदास्मृताः ॥ वाध्रियश्चावैन्यसंज्ञाभृगोःपंच

गणास्मृताः ॥ रथागौतमाश्चभरद्वाजाःकपयोहरितास्तथाकण्वाविरूपामौ[illegible]

द्वैष्टमोगिरागारस्यात्रिजातागाधिजश्चैवकश्यपश्च्युतथैवाहिवारिष्ठागस्त्यइत्येतेअष्टादशगणा
स्मृता:॥२९॥भृगवोजामदग्न्याश्चयास्कवाधूलसंज्ञका:॥मार्गवश्चावितायारहाश्ववानास्तथोर्व
जा:॥३०॥सावर्णिकाश्चजवंतिसंज्ञाजाबालयस्तथा।एतन्नायननामानोनैरोध्यास्ततःपरं॥३१॥आ
वटामंडवश्चैवततःप्राचीनयोग्यजा:।आर्ष्टिषेणास्तथानूप एते द्वादशगोत्रजा:॥३२॥मिथोवि
वाहतां तिसमानप्रवरायतः।मांडवैसैहसंज्ञैश्चरेफवाहास्तथैवच॥३३॥भृगवोजामदग्न्याध
विवाह्या:प्रकीर्तिता:।भृगवोवीतहव्याश्चयास्कवाधूलसंज्ञका:॥३४॥मौनाश्चमौकलाश्चैव
वि सांख्यैनसशवौ।मिथोविवाहंनार्हतिसमानप्रवरायतः॥३५॥भृगवश्चैववाध्र्यश्चतथामि
त्रयुवास्त्रय:।मिथोविवाहं०॥३६॥भृगवोगृत्समदजाशौनकाश्चत्रयोप्यमी॥मिथोविवाहं० ॥२५
३७॥भृगवोवैन्यसंज्ञाश्चपार्थिवाश्चत्रयोप्यमी॥मिथोविवाहं०॥३८॥मिथोविवाह्या:पंचगण
स्तेषामाद्यंद्वंद्वंगुविना।जामदग्न्यादृप:पंचमिथोग्राह्याविनादिमं॥३९॥एकवत्सर्षिभिर्वत्सव
रेषनुवर्तते।नावत्समानगोत्रत्वमजेष्ट्वङ्गिरोगणा:॥४०॥अथाङ्गिरगणा:।आङ्गिरसा

शौ४

आयास्यश्चाप्योतथ्यौ औशीजास्ततः । काक्षीवता वामदेवा बृहदुक्थाश्च सप्त वै ॥४१॥ एते गोतमसंज्ञास्युर्भिन्न
प्रवरका अपि । समाने प्रवरत्वेपि व्यवहारा हता हताः ॥४२॥ मिथो विवाहन्नाग ॥ आंगिरसा बार्हस्पत्या भर
द्वाजास्तथैव च ॥ कुक्षवश्चाग्निवेश्याश्च तथौजायनसंज्ञकाः ॥४३॥ सर्वस्तंबास्तंबाः शाक्षा ... भृगाश्च
कृतजास्तथा । ततः शैशिरयो शीला ... कांबादत्तसंज्ञकाः ॥४४॥ तथैव यातवचसः स्वते त्रकपयोपि
च । गार्ग्यश्च कपयश्चैन्यासैन्यानेको न विरुपाति ॥४५॥ भरद्वाजा मिथो नास्युन संबंधी यस्तु सवाता
मिथो विवाहं ॥४६॥ एतेषां तु विशेषोपममनीत्या मिथो नकैः ... रक्षैश्चैव कपिभिर्विवाहस्त्रिभिरि
ष्यते ॥४७॥ सरस्वीति तलश्चैव बिंदुरान्त्यः पवेजालिः । श्वयस्सीवर्णिकिश्चैव ... चाष्टधा
॥४८॥ सपेपुत्रा सभाद्दिष्टास्तेषां कापितिरिष्यते । कपिप्रासिद्धगुद्दितास्वतंत्र ... परस्परं स्युगार्ग्यः ।
तत्रत्युतत्रस्य कश्चो विवाहो मिथो भरद्वाजकुलस्य चाङ्गः ॥५०॥ आंगिरसाश्च हारिता अंबरीषास्ततः
परं । यौवनाश्वस्य मांधातको त्साः पिंगास्ततःपरं ॥५१॥ त्रां खाद ... हयगवा एते चाहद्वा गोत्रजाः । मि
थो विवाहं ॥५२॥ आंगिरस आजमीढ कण्वाश्चैव त्रयोप्यमी ॥ मिथो विवाहं ॥५३॥ आंगिर
सा विरूपाश्च नथाराथंतरा अपि । ऋषदश्वा आष्टहंष्ट्रास्तेत्वेते पंच गोत्रजाः ॥५४॥ मिथो

॥३॥ बार्हस्पत्या भरद्वाजा गार्ग्याः सैन्याश्च मुद्गलाः आपस्तंभाः

आंगिरसश्च साम्यश्च मौद्गल्यास्त्वक्षयस्तथा॥ चत्वार एते विख्याताः एषां त्रेप्रवर्तकाः॥ मिथो विवाहः॥ ५६॥ आंगीरसो विष्णुवृद्धौ पौरुकुत्सास्तथैव च॥ ततश्चापि शाठाश्चैव कठाश्च माषिनस्तथा॥ ५७॥ त्रासदस्या रात्मानस्च मिणा सिङ्गणा मङ्गणास्तथा॥ वारेरायणनाम्नान तथोपामि तिसंज्ञिकाः॥ ५८॥ तथौपगवयः ख्याता ततः सायाकिनाद्धिताः॥ सात्यकामा आरुणपास्तथैव च निरुंधेयाः॥ ५९॥ चतुर्दशो ते विख्याताः स्तद्धचाँ त्रेप्रवर्तकाः॥ मिथो विवाहः॥ ६०॥ कल्पसंस्युः शामीवस्रोपवनायन एव च॥ वत्सा प्यायनकाः लेवीपतिनश्च यथाप्यमी॥ ६१॥ विष्णुवृद्धा समुद्भूता मम गोत्राः प्रकीर्तिताः॥ मिथो विवाहः॥ ६२॥ अजामीढा विरूपाश्च समूला विष्णुवृद्धाः॥ एते च नुर्गुणाः प्रोक्ता विवाहास्तु परस्परं॥ ६३॥ मिथो विवाह्याष्टगणा आद्या मांगिरसं विना॥ अत्रिजास्त्वथ वक्ष्यंते आत्रेयश्चार्चिनोनसाः॥ ६४॥ तथा श्यावाश्वसंज्ञाश्च गविष्ठिरसमुद्भवाः॥ धनंजया पि थेयो श्च वामरथ्यास्तमङ्कौ॥ ६५॥ बीजवापिन इत्येतेन वैव त्रिगणास्मृताः॥ मिथो॥ ६६॥ विश्वामित्रादिवराताश्चिकीतामनवस्तथा॥ तंतवश्चाप्यौलकेपो बाला व्यास्य ततः परा॥ ६७॥ याज्ञवल्क्यस्तथोल्ह

याना कुत्सासांकृत्याः सह गोत्रजाः॥

॥२६॥ (margin)

स (margin)

॥२॥ (margin)

(51)

कास्तथैवबृहदग्नयः॥बभ्रवः शाल्ङ्कितिवाशाल्ङ्कावतस्समुद्भवाः॥६८॥शालंकाय
नेनामानस्तथाकालभवा अपि औदराश्चौमताश्चैव कामकायनसंज्ञिकाः॥६९॥
वैवश्रवसगोत्रांश्च तथैव नरसा अपि। आज्या मधुछंदसाश्च धानंजयास्तथा
ख्याताः॥७०॥ लोहिताः पूरणा धाय्या परिधाय्याघमर्षणः॥ कौशिकाश्च तथा चापि
स्तनवः प्रनवस्तथा॥७१॥ धूम्राश्च जठरास्तद्वद्दावगारिहहव्यजः॥ रतयः क्षील
संज्ञाश्च अग्निदेवाभिधानकाः॥७२॥ तथैवोमरिणश्चैव सांशिवयाश्चांगिका
णः तथा वाराकिताश्चापि कुरवः श्वेतिकीर्तिताः॥७३॥ चतुश्चत्वारिंशदेते वि
श्वामित्रभवा इति। मिथो विवाहं नार्हंति समानप्रवरा यतः॥७४॥ काश्यपा
श्चाप्यवत्सारा नैध्रुवा रेफसंज्ञकाः। रैभ्याः शांडिल शांडिल्यो देवला असितास्त
था॥७५॥ नव चैते समानेन काश्यपा इति कीर्तिताः॥ मिथो विवाहं नार्हं॥ दीव

॥४८॥

(५२)

गालवपुत्रस्युः

सिष्ठाइंद्रप्रमदा भरद्वसुस्तथैवच ॥ पराशराशाक्तयश्च तथैवच्छुपमन्यवः ॥ ७७ ॥ ततश्च
मैत्रावरुणकौंडिन्यः कुतिमाषजः ॥ तथा सांकृतयो गौरवीताश्चैकादशास्म
ताः ॥ ७८ ॥ मिथो विवाहं० ॥ अगस्त्यश्च प्रथमं तथा ~~श्चमयुताम~~ ताः ॥ ७९ ॥
इध्मवाहास्त्वयोप्येते ह्यगस्त्यकुलसंभवाः ॥ मिथो विवाहं नार्हंति० ॥ ८० ॥
१२७ ॥ एवं सामान्यतः प्रोक्तो विशेषस्त्वभिधीयते। विश्वामित्रौ जामदग्न्या विवा
हास्युः परस्परं ॥ ८१ ॥ देवरातान्वर्जइत्वेत्याजधर्मप्रवर्त्तकः ॥ विश्वामित्र
भरद्वाजा विवाहास्युः परस्परं ॥ ८२ ॥ शुंगाश्च कातांश्चैशिराश्च वर्जइत्वेतिच ॥ १२७ ॥
स्मृताः ॥ विश्वामित्रात्रेयश्चापि विवास्युः परस्परं ॥ ८३ ॥ धनंजयान्वर्जइ
त्वेत्याजधर्मप्रवर्त्तकाः ॥ कश्यपाश्च वसिष्ठाश्च विवाहास्युः परस्परं ॥ ८४ ॥
संकृतान्पूतिमाषांश्च वर्जइत्वेतिसंमताः ॥ देवराता विवाहास्युः सर्वत्रैतिच

का:

53

स्मंमताः॥ विश्वामित्रा जामदग्न्यान्वर्जइत्वा ततोऽन्यतः॥ भृगुणां कतां शैशिरास्तु विवाहस्यु समंततः॥८७॥
वि विश्वामित्रा जमदग्निस्तरद्वाजान्वर्जइत्वेति ते स्मृताः॥ धनंजयानां सर्वत्र विवाहः प्रोच्यते बुधैः॥८८॥ वि
श्वामित्रांतथैवात्रिवर्जइत्वा ततोऽन्यतः॥ भूतिमाषाः सांकृतयो विवाहार्हाः समंततः॥८९॥ काश्यपाश्च
वसिष्ठाश्च वर्जइत्वा ततोऽन्यतः॥ आनष्टपौरानकुत्सास्तयो राज्यचापरः॥९०॥ सौराज्यक्षीरजाश्चैव वि
वाहस्तदनंतरं। तथोत्रवाभृचयः प्रोक्ताः सैरंध्रा राज्यसेवकाः॥९१॥ या पूर्तिगाक्षिलौगाक्षिनतथैव ग्रारद
बकाः॥ एते त्रयो हराग्रात वसिष्ठाग्निर्निकश्यपा॥९२॥ गायत्र्यायोनिसंबंधाद गोत्रप्रवर्तकाः॥ अहवीति
ष्ठतारात्रौकश्यपत्वमपिस्थयं॥९३॥ तेषां गोत्रद्वयं मुक्त्वा वसिष्ठकश्यपं तथा। सर्वत्रापि विवाहस्या
दिति कृदविदो जगुः॥९४॥ समानो हकनाये षां मापिंज्ञंबालवेधदि। तेवद्यपिहव्याकव्येषु नेतरे गोत्रि
णो द्विजाः॥९५॥ इति प्रवरनिर्णयः॥ अथ सापिंड्यनिवृत्तिः॥ पंचमीं सप्तमीं चैव मातृतः पितृतस्तथा।
दत्त्वाक्षिः पुरुषैरव्याता श्रोत्रियाणां महाकुलान्॥९६॥ उद्वहेत्सप्तमादूर्ध्वं तदभावे तु सप्तमीं। पंचमीं त
दभावे तु पितृपक्षेऽप्ययं विधिः॥९७॥ सप्तमीं च तथा षष्ठीं पंचमीं च तथैव च॥ एवमुद्वाहयेत्कन्यां
न दोषः शाकटायनः॥९८॥ तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि विवाहयेन्मनुः प्राह पारा श

54

रोगिरादयः॥ ६६॥ यस्कन्दे शानुरूपेण कुलरूपेण चोद्वहेत। नित्यसंव्यवहार्यस्याचैरस्यैतदुद्वहयते॥ ६०॥
चतुर्थीमुद्वहेत्कन्यां चतुर्थः पंचमीमपि। पैराशरमतात्षष्ठीं पंचमो न तु पंचमीं॥ १॥ बध्नावरस्य याता नः कु
रस्त्राद्वाद्विसप्तमः। पंचमी चेत्तत्वोमा तानसापिंड्यं निवर्तते॥ २॥ सापिंड्यपितरैः सूतां च भगिनीं मातृष्व
सारः स्वसुतां ज्येष्ठभ्रातृपितृव्यपत्नीं तद्भगिनीं भार्यासुतां नोद्वहेत्। अन्यायेनैव कृतौ यदि तदा त्याज्या अ
व श्यः सर्वदा प्रायश्चित्तविधानमत्र विहितः स्यान्मातृवत्पालनं॥ ३॥ मातुलस्य सुतां केचित्केचित्पैतृ
ष्वसुः सुतां। विवाहे तु कचिद्देशे धर्मकार्यापि सपिंडतां॥ ४॥ मातुलस्य सुतां विप्रो दक्षिणे तां स
मुद्वहेत्। वर्जनीया प्रयत्नेन नमैव वाजसनेयिभिः॥ ५॥ पितृव्यभार्याभगिनीं च तत्सुतां सप
त्नमातुर्भगिनीं च तत्सुतां। नैवोद्वहेत्तां यदि चेत्प्रमादाच्चांद्रायणेनैरिव कारणं भवेत्॥ ६॥
इति सापिंड्यनिवृत्तिः। अथ प्रतिकूलविचारणा॥ वाग्दानानंतरं यत्र कुलयोः कस्यचिन्मृतिः। त
दा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत्॥ ७॥ पितुरष्टमशोचं स्यात्तदर्धं मातुरेव च। मासत्रयं
तु भार्यायास्तदर्धं भ्रातृपुत्रयोः॥ ८॥ अन्येषां तु सपिंडानां मासमेकं स्मृतं। तदंते रा॥

॥२८॥

२८॥

22

४ अस्याप्रसाद ॥१८ क३

तिकं कृत्वा ततोलग्नं विधीयते ॥ ९ ॥ पुरुषत्रयपर्यंतं प्रतिकूलं स्वगोत्रिणां विवाहान्निर्गमस्तावत्तथा मुंडनमुंडने ॥ १० ॥ प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियां । आचतुर्थं ततः पुंसि पंच मे शुद्धिर्भवेत् ॥ ११ ॥ वधूवरार्थं घटिते सुनिश्चिते जनस्य कस्यान्मरणं तयोर्गृहे ॥ वर्षात् गतादि गतं निस्वे प्रणीतं तदा विवाहो न कदाचनेन ॥ १२ ॥ दाहे ने विवाहे यज्ञे च संग्रामे देशविप्लवे । आपद्यपि च कष्टायां सद्यः शौचं विधीयते ॥ १३ ॥ दातुः प्रतिगृहीतुश्च कन्यादाने च नो भवेत् ॥ १४ ॥ विवाहयिष्यक कन्या यालाजाहोमादिकर्मणि ब्रतयज्ञ विवाहे षु श्राद्धे होमेर्चने जपे ॥ १५ ॥ आरब्धे सूतकं न स्याद् नारब्धे तु सूतकं । आरब्धो वरणं यज्ञे संकल्पो व्रतसत्रयोः ॥ १६ ॥ नांदीमुखे विवाहादौ श्राद्धे पाकपरिक्रिया ॥ १७ ॥ पाकश्राद्धे शौचपतितेन सर्वो दितिति श्रय ॥ एकविंशत्यहर्यज्ञे विवाहे दशवासराः त्रिषड्ढो पनयने नांदी श्राद्धं पुरोहिते । नाद्यविवाहो धर्म्यः तु त्रयापि विवाहकार्यं इहितुः प्रकुर्यात् । न मुंडनाद्वापि हि मुंडनं च गोत्रैकता यायदि नाद्य भेदं ॥ १९ ॥ एकोदर भ्रात्र विवाह
विवाहे पोऽरत्नोह ने चौलो पनयमन्ते रचा । पकं विं शत्यह हे धेर नांदी

कार्यं स्वसोन पाणिग्रहणं विधेयं ॥ षण्मासमध्ये मुजयोर्वदंति न मंडनं मुंडनतोपि का-
र्यं ॥ २० ॥ ऋतुजयस्य मध्ये चेदब्दाद्धस्य डवेशनं ॥ तदाह्येवोद्वरस्यापि विवाहस्तु
शस्यते ॥ २१ ॥ द्विरोमनं त्वेकतेहे पिनेहं शुभं तु पञ्चोन्नवर्दिनैस्तु ॥ आवश्यकं
शोभनं तु समं वा ना द्वार मधुनाज्येन वायुक्तं मधुपर्कामिधेयं दधि ॥ २२ ॥ दध्यलाभे पयो
७॥ ग्राह्यं मध्वालाभे तु गुडः ॥ निदध्यात्तन्नवे कांस्ये तथोपरि विधापयेत् ॥ २३ ॥ वेष्ट
ये द्विष्टरेणैव मधुपर्कं तदुच्यते ॥ प्राणानायम्य संकल्प्य विष्टराद्यर्चनं भवेत् ॥ २४ ॥ ॥२८
त्रिस्त्रिब्रूयादिदं वर्ष्मं मंत्रेणानेन विष्टरं ॥ पाद्यमर्घ्यं तथा दद्यादाचमनीयकं ॥
॥ २५ ॥ पिबेज्जलं चामृतोपस्तरणमसि मंत्रतः ॥ आचमेन्मधुपर्कीयं मित्रस्येति निरी-
क्षयेत् ॥ २६ ॥ देवस्यत्वेति तद्द्यादंजल्यौ प्रतिगृह्य च ॥ तदवेक्ष्य करे सव्ये धृत्वा मत्रजपेन
तु ॥ २७ ॥ अंगुष्ठानामिकाभ्यां त्रिस्तदवालोडयेद्वरः ॥ मधुपर्कं क्षिपेत् किंचिद्दसस्ये

यवाचार्यविमृक्तोवा॥२२॥एकोदरप्रसूतानांनाग्निकार्यत्रयंभवेत्॥
भिन्नोदरप्रसूतानांनोतिशातातपोब्रवीत्॥२३॥फाल्गुने
चेद्विवाहस्याच्चैत्रेचैवोपनायनं॥अब्दभेदात्प्रकुर्वीतनत्रि
त्रयविलंबनं॥२४॥दाराग्निहोत्रसंयोगंकुरुतेयोग्रजेस्थि
ते॥परिवेत्तासविज्ञेयःपरिवित्तिस्तुपूर्वजः॥२५॥अग्रजेसं
स्थितेतस्यआज्ञयाकुरुतेनुजः॥विवाहाधानयज्ञादौपरि
वित्त्याद्यदूषणं॥२६॥नाग्नयःपरिविंदंतिनवेदानतपांसि
च॥नचश्राद्धंकनिष्ठस्ययाचकन्याविरूपिका॥२७॥विवा
हान्नधिकारस्यज्येष्ठकन्यास्थितायदा॥तदानुज्ञांविनाची
पिकनिष्ठामुद्वहेत्तदा॥२८॥कालप्रतीक्षणंनस्याद्द्वेजोदुष्ट

नदोषमाकू॥ पंचर्वं चेद्वरोगष्ठिद्व ग्दानेयदिचैवक्ते॥२८॥कंन्यान्यस्मैप्र
दा८ तव्यातथासप्तपदास्तुग॥ क्तेतेसप्तपदेयस्यावरेपचत्वमागते॥२०॥
नदेयापुनरंन्यस्मैकाळौकंन्यामनीषिभिः॥स्नातकायसुरौव्यायकु
लोत्तमभवायच॥२१॥दद्याद्वेदविदेकंन्यामचितायवरायच॥आ
चार्यस्नातकादीनामधूपकोर्चनंचरेत्॥२२॥स्वगृह्योक्तविधा॥३०॥
॥३०॥ नेनविवाहेचमहामखे॥ शोधपत्रयेकूणतीस२९वोळि४ल था च
म हुर्त मातेंड विषयेकुळुध्याहव्रत चूडकेव्र दत्तत्स्व
स्ति तैल स्तपणे श्राद्धपिंडयुत महालयगयापे सू
विनानाचरेत॥पूर्वे सप्तपदी विधेरघिगते दोषेवरे
वा मन्ने देयान्यत्रे विवाहितापिच पलायाविद्धयानिनचेत॥

त्रिष्पर्वतः॥२८॥ न्यस्तेभ्यस्त्वाक्षिपेत्त्रिस्त्रिर्निदध्यादुविभावनं॥ कर्त्तादायसव्यहस्तेमधु
पर्कं वरस्य च॥२९॥ जदोप्य बिराज्ञोथ प्राशयेत्सुनराचमेत्॥ पूर्ववच्चावदानस्यान्नं
त्रोन्यः प्राशनेभवेत्॥३०॥ उक्तं सूत्रे विजानीयात्तृतीये प्राशने तथा॥ उत्तराचमनं पी
व्यास्तत्यभित्युदकं पिब॥३१॥ द्विराचम्योत्सृजेन्मातारुद्राणां मंत्रतो वरः॥ ततः कर्त्तार्चये
देनं गंधपुष्पाक्षतादिभिः॥३२॥ वराय वाससी दद्यादुपवीतादिकं च हि॥ वरयेच्चतु
रो विप्रान्कन्यकावरणाय च॥३३॥ कन्यासमीपमागत्य विप्रा गोत्रपुरःसरीं॥ ना
मश्रयुर्वरस्याथ प्रपितामहपूर्वकं॥३४॥ प्रपौत्रपौत्रपुत्रेषु चतुर्थ्यंतं वराय च॥ गोत्रे
ष्वपितृसंबंधे षष्ठी स्याद्वरकन्ययोः॥३५॥ वरे चतुर्थी कन्यायां विभक्तिं द्वितीये वदि
श्रावयेयुः प्रस्तुमंतास्ते तौन्यांकनिक्रदत्॥३६॥ देवीमन्त्रं पठंतश्च नयेयुस्ते द्वि
जा वरे॥ प्राङ्मुखी कन्यका तिष्ठेद्वरः प्रत्यङ्मुखस्ततः॥३७॥ वस्त्रांतरं तयोः स्ये

मध्येतु वरकन्ययोः॥ परस्परे मुखं पश्येयु कृत्तेचाक्षतान्क्षिपेत्॥३८॥ वरमूर्ध्नि कन्यादौ
कन्यास्तु द्विवरस्तथा॥ गाथामिमां पठेयुस्ते ब्राह्मणाश्चैकचवाइदं॥३९॥ क्षिपेयु
रक्षताः ताश्च विप्राः शिरसोरुभयोरपि॥ तिष्ठत्प्रत्यङ्मुखी कन्या प्राङ्मुखस्याद्वरस्ततः॥
॥४०॥ मंत्रेणानेन क्षेरोश्चैव नैवेद्यं नविपर्ययः॥ अक्षतारोपणंकुर्यात्सर्ववर्णेष्वेवक
ज्येका॥४१॥ स्त्रियोमेकेन्यकामंत्रः जीवजायैस्याद्वरस्यतु॥ त्रिवारमेवकीक्ष्यां
रुकन्यांदद्यात्ततः परं पिता॥४२॥ शिष्टाचारानुसारेण वदंत्येके महर्षयः॥ लक्ष्मी
रूपामिमां कन्यां प्रददे विष्णुरूपिणे॥४३॥ तुभ्यं चोदकपूर्वां तां पितॄणां तारणा
य च॥ वरगोत्रं समुच्चार्य कन्यायाश्चैव सर्ववेद॥४४॥ एष धर्मार्थकामेषु न
त्याज्यास्त्वस्तातात:॥ दानापठेदिमंमंत्रं कन्यातारयितुस्वयं॥४५॥ अक्षता
रोपणेयाय मंत्रउक्तो महर्षिभिः॥ इहापि सर्ववर्णेषु कुर्यादक्षतारोपणंसकृत्॥४६॥

॥१९॥ ॥२०॥

पश्चान्मेकन्यकामंत्रःपश्चाद्योमेवरस्यतु।ईशानकोणतःसूत्रंवेष्टयेत्सचयोस्तयोः।।५८।।परिवेष्याद्
द्विगुणंत्रेःकुर्यात्तत्सूत्रंचतुर्गुणं।रक्षार्थेदक्षिणेहस्तेबध्नीयात्कंकणंतयोः।।५९।।विसृज्यतान्तेसवान्
संःकन्यायाश्चहस्तत्तथा।कन्यायैवाससीदद्याद्युवमित्यनयावरः।।६०।।नयोरूत्तेतेबध्नीयानी
कंकोहितनिसूत्राचाबध्नीयात्कन्यकाकंठेसूत्रमणिसमन्विते।।६१।।मांगल्यतंतुनानेनमंत्रेणस्या
त्सदासती।पुण्याहंस्वस्तिऋद्धिंचत्रिस्त्रिर्ब्रूयाद्वरस्यतु।।६२।।अनाधृष्टमुभौमंत्रावापोह्यानःप्रजांत
था।नमस्कुर्यात्तदागौरींसहांमंगलदायिनीं।।६३।।तेनसातिर्मळालोकेभर्तवेत्सौभाग्यसोगिनी।।
दंपतीतुप्रदक्षियातहोमार्थंचैववेदिकां।।६४।।वरस्यदक्षिणेभागेवधूंतामुपवेशयेत्।।आघारां
तंतःकुर्यादुपलेपादिपूर्ववत्।।६५।।सूत्रोक्तविधिनाकर्ममध्येकृत्वातुचैवहि।अग्नआयूंषिपीति
तेद्वौत्रसमर्यमाप्रजापते।।६६।।कन्याचाज्यायुतीरिवसूत्रोक्तंपाणिपीडने।वरस्त्रिःप्रोक्षयेल्लों
जांशूर्पस्थानासिंधारयेत्।।६७।।अस्तिधार्याजलिंतस्याःप्रत्यासिंधारयेत्।।अंजळौकर
येह्रज्ञाताज्लोन्चधावियाहके।।६८।।विच्छिन्नवह्निसंधानेपतितेल्लाजादिनावपेत्।।कवाला

(62)

जां नतोहौ मोहं जपन्कुर्यात्प्रदक्षिणं ॥६९॥ सोदकुंभस्य वै चाग्नेरश्मानमवरोपयेत्॥ विधिरेषु विवाहस्याप्र
त्याहुति प्रदक्षिणं ॥७०॥ मंत्रोर्यमणं वरुणं पूषणं जुहोमि के। अवारोष्टाश्वरोल लाजैरत्प कोणे चैव हि॥
७१॥ अस्यामग्नजुहुयात्तु षष्ठीं इति यज्ञविदां मतं॥ यदि बह्वो शिखे तस्यां तां कन्यकां वरयेदपि ॥७२॥ प्रलेत्य
नावरे बध्नात् षष्ठीं वरस्य मोचयेत्॥ इषइत्यादिभिर्मंत्रैरीशान्यां चालयेद्वधुं॥७३॥ गत्वा पदा निसप्त
थस्यावोज्यासिरसीचते। कुंभस्थे सलिलं सिंचेदुभयोः शिरसोस्तथा ॥७४॥ सौभाग्यदेवनीं देवीं सूर्य
वाहाक्षायणी शिवा। ततः स्विष्टकृदादि स्याद्धोमशेषं समापयेत्॥७५॥ अहः शेषं वृति प्रति छेमौने
नेवधुर्दंपती। ध्रुवं चारुंधतीं दृष्ट्वा विसृजेत्तामुक्षो वच॥७६॥ पतिपुत्रवतीज्ञा सिस्तयोर्दद्यात्यथो चिता॥

॥३२॥

अनेन विधिना संनो विवाहाग्निरितिस्मृतः॥७७॥ सवर्णवस्याद [illegible] इति [illegible] विद्वोविड्डा॥
दिवा वायदिवा रात्रौ कन्यादानं च यातवेत्॥७८॥ तद्दानीमेव होमं तु कुर्याद्वैवाहिकं च यत्॥ इति

॥३२॥

विवाहमैलोम प्रकरणं॥ वध्वास हगृहं गच्छेदाहायाग्निं तमच्युतः। सूत्रोक्तविधिना चेह प्रियमृद्धांप्र
वेशयेत्॥७९॥ प्रतिष्ठापन नेलं कुर्यात्चिस्तुष्यं तं च पूर्ववत्॥ अग्निस्थयजुहुयाद्दाज्यमानः प्रजां

63

वतस्मृतिः ॥ ८० ॥ समंजंत्वनया प्राप्य पदधितस्यै प्रयच्छति ॥ अनग्नितस्यैः हृदयेतस्या अर्घ्यकाले घृतं च वा ॥
८१ ॥ मंत्रादिलोपहोमांतरूत्याचित्विष्टकृतादिकं कृत्वापि स्यान्नस्यात्र पत्नीव मे समानयेत् ॥ ८२ ॥ नवोढ
मनयेसत्नीवाम वामंत इत्यृचा ॥ वामघेत्य चावैकेततः पूर्णमसीतिचा ॥ ८३ ॥ यदिकाळवशात्कंतुंपृ
थग्घोमद्वयं न चाद्यमाध्येककाळेवाकर्तव्यमितिकेचन ॥ ८४ ॥ कुंभस्थजळसिक्तांतं कृत्वा सर्वं तद
हितः ॥ प्रत्यचं ऊरुत्या प्राज्यमानः प्रज्ञांवरश्ते भिः ॥ ८५ ॥ समंजंतो त्विति चारभ्य सर्वं पूर्ववदाचरेत्
स्वस्थानीयवधूं वामे स्वधर्मास्यादिकं चरेत् ॥ ८६ ॥ रात्रिहनिं वा रात्रिकं न्यायाप्तौ कृत्वा यदा ॥ तदा तीर्मि
वहोमस्याद्विवाहस्य चासिद्धये ॥ ८७ ॥ यावत्स्वपत्नीनस्याद्विवाहो नैवसिध्यति ॥ सनघतो होमभि छंतित
ः सापमुपासनं ॥ ८८ ॥ विवाहस्योदये द्रात्रौ सार्द्धयामद्वयादधः ॥ तदैवोपासनं कुर्यात्केचिदूचुर्विदो
विदुः ॥ ८९ ॥ रक्षितुं येद्रुत्याग्निं शक्यते तं निरंतरं ॥ समिधारोपयेन्नित्यं विधिवच्चैव बह्वृचः ॥ ९० ॥ दि
त्यहोमे तु काळस्याद्रात्रौ नाडी नवात्मकः ॥ द्विगुणस्याद्विवाहे तु प्रवदंति महर्षयः ॥ ९१ ॥ दंपती
नियमेनैव ब्रह्मचर्यव्रतेन तु ॥ वैवाहके गृहे तौ च निवसेतां चतुर्दिनं ॥ ९२ ॥ चतुर्थस्य दिवस्यांते
वामे चाभ्यंगुय दंपती ॥ उष्णाम्न हेश्वरौ न चार्वरादानं प्रदापयेत् ॥ ९३ ॥ सोज्ञमस्तयनं हसनौ स्नान

65

४ पाकस्य परिसंस्मृतात्पाकप्रो भ मीमिति स्मृतेः ४

तथैकयोपवेशानां गृहप्रवेशपर्यंतं दंपत्योर्मुनयो विदुः ॥७५॥ ब्रह्मामहेश्वरो गच्छेत्स्वयं मृहपं [illegible]
गच्छोत्तक्षितिविधिनाचैव रेखाधर्मेण वापि च ॥७६॥ नांदीश्राद्धं द्विजः कुर्यात्स्वस्तिवाचनपूर्वकं [illegible]
वे रामा रथ्यपितर्यपि च जीवति ॥७७॥ स्वजीवपितृको नांदीश्राद्धं चेत्कुरुते द्विजः ॥ पि[illegible] वपितृ
णां तु प्रवदंति महर्षयः ॥७८॥ प्रथमोद्वाहपर्यंतं पुत्रस्यैव क्रियास्वपि ॥ नांदीश्राद्धं पिता कुर्यात्तत्र
तु तस्य च पं ॥७९॥ चत्वारो ब्राह्मणा दैवे पित्र्ये चाष्ट द्विजास्मृताः ॥ नांदीश्राद्धं वरस्यैवं मुनयः पंच वा
पि च ॥१००॥ विवाहे चोपनयने गर्भाधानादिकेषु च ॥ अग्न्याधाने शांतिविप्रांश्च भोजयेद्दक्षिणा
न्वितान् ॥१॥ विवाहोत्सवयज्ञेषु दैवे पित्र्ये च कर्मणि ॥ प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकं ॥२॥
प्रारंभोक्मर्मणश्चैव क्रियाप्रारंभकस्य च ॥ क्रियावसानपर्यंतं तस्याशौचं न दिष्यते ॥३॥ प्रारंभो व
रणं यज्ञे संकल्पो व्रतसत्रयोः ॥ नांदीश्राद्धं विवाहादौ श्राद्धं पाकपरिक्रिया ॥४॥ मौंजीबंधाद्व्रतार्थे
ऽपि विवाहास्य च मेहनि । देवकोत्थापनं कुर्यात्सममेवाथवा समे ॥५॥ नांदीश्राद्धं तु मोहादौ श्रा
द्धप्रयादिकारिके । सपिंडः कुरुते यश्च दृष्यं सत्रजेध्रुवं ॥६॥ अलाभे सुमुहूर्तस्य विघ्नं य
त्कुरुते यदि ॥ स्वधायां तु विवाहस्य नत्वपरे भुक्तं काचित् ॥७॥ विघ्नमाचरते यस्तु यज्ञस्यादास

नं ?

१२ ॥

नं ५ ॥२२

औ १ ६

कस्यचापात्रायांचैव धर्मस्य प्रयाति नरकं ध्रुवं ॥८॥ पुढायादुहितुश्चान्नं नाद्यादिक कथंचन । आज्ञान
द्यदि भुंजीत नरकं प्रतिपद्यते ।९॥ इत्याद्युच धर्मशास्त्रे विवाहप्रकरणं नमद्वाहरा: ॥ अथपत्नीकुमारी
पवेशानं । संस्कार्यः पुरुषो वापि स्त्री वा दक्षिणतो भवेत् ॥ संस्कारकस्तु सर्वत्र तिष्ठेदुत्तरतः सदा ॥१०॥ धा
र्मकार्येषु सर्वेषु व्रतोद्यापन शांतिके । वामे स्त्री दक्षिणेकर्ता स्थालीपाके तथैव च ॥११॥ माङ्गलिके चाभि
षेके च कन्यापुत्रविवाहिके । आशीर्वचनकाळे च पत्नी स्यादुत्तरे सदा ॥१२॥ विच्छिन्नचक्रसंधाने
कन्यादाने वरार्चने । नवोढाप्रवेशे पत्नी दक्षिणे स्यच यमुत्तरे ॥१३॥ आरण्याधानकं कर्म यावन्मौंजी निबं
धने । कर्ता स्यादुत्तरे तावत्पत्नी पुत्रश्च दक्षिणे ॥१४॥ पत्नीं विना न तत्कुर्यात्संस्कार्यं कर्तयाद्धि
शेः ॥ पत्न्यां चैव तु जीवत्स्यां विधिरेष उदाहृतः ॥१५॥ सुतसंस्कारकर्माणि पिता कुर्यात्स सार्यकं ४
महत्वाद्वेधिकारी यकुर्यादेव स्वचार्पो । व्रहि ॥१६॥ पिता यस्य मृते चेत्स्यादधिकारी पितामह ४
तदभावेपि तु [illegible]त्रा पितृव्यो गोत्रजो गुरुः ॥१७॥ व्रतबंध विवाहेषु कन्याया श्चापि वैतथा ॥
सपत्नीकोप्यपत्नीकः सोधिकारी भवेदिह ॥१८॥ संस्कार्यस्य च वैयस्य पदिन्माता विपद्यते ॥

पत्नीं विनेति नियमः सद्भिश्चैवात्र नोच्यते ॥१९॥ गृहस्थो ब्रह्मचारी वा योधिकारी स एव हि ॥२०॥ अथ
नांदीश्राद्धं । आधाने पुंसवसीमंते जातनामानि निष्क्रमे । अन्नप्राशनके चौळे तथा चैवोपनायने ॥२१॥
तंतश्चैव महानाम्नि तथैव च महाव्रते । अथोपनिषदो दाने । समावर्तनकेषु च ॥२२॥ विवाहे नि
यतं नांदीश्राद्धमेतेषु शस्यते । प्रवेशे च नवोढायाः स्वस्तिवाचनपूर्वकं ॥२३॥ अन्यान्यत्र वदंत्ये
के नांदीश्राद्धं महर्षयः ॥ प्रागेव प्रथमे वेदे त्वीकारे च मखाम्नरवे ॥२४॥ मातृवर्गोद्दितः कुर्यात्
तुर्मातामहस्य च । न वैते पितृमेवोद्दिः श्राद्धे सद्भिरुदीरितं ॥२५॥ कन्यादाने च यद्दिष्टौ च प्रपितामह
र्वके । नामसर्कीर्यपि द्विजानन्यश्चारोहणं क्रमात् ॥२६॥ नांदीश्राद्धे कृते मावद्देवको त्थापनं भवेत् । ॥२२॥
तावद्द्र्यपि चैतानि वर्जयेद् बुधसत्तमः द्विजः ॥२७॥ स्नानं स्त्री तोदके नैव प्रतं चोपोषणं तथा । ब्रह्मयज्ञ
वेदा ३ च वै श्राद्धं सैव त्रुष्ठानमेव च ॥२८॥ शावेक्षणं च भेधाकारस्म श्रुके शानिकृंदनं ॥ सीमातिक्रमण
चैव श्राद्धभोजनमेव च ॥२९॥ न कुर्यात् कृतवती चस्यपिंडा अपि चैव हि । यस्तु वै कुरुते मो
हाद्भ्रश्यते स च वै सवेद ॥३०॥ विवाहे चोपनयने कृते चौळसुतस्य च । सपिंडानि सपिंडांश्च श्राद्ध

अर्धं दृष्ट्वा मर्त्यार्थतः क्रमात् ॥ ३१ ॥ मातापित्रोर्मृताहे च गयायां च महालये । दर्शादि सिंहजन्मनो दाहः श्राद्धे धन्येषु वर्जयेत् ॥ ३२ ॥
नांदीश्राद्धे कृते विप्रस्तथा चैव तु पैतृके । प्रेतपिंडे दत्ते तु मैव कुर्यादुपोषणं ॥ ३३ ॥ इ० या० ध० विवाहोपरि वर्षं यदि स्यादहः ॥
अथ परिस्तापा । प्रेतकर्म ॥ क्रियते परिस्तापावैप्रेतकार्यस्य चैव हि । यत्र यत्र विशेषस्यादुक्तः सूत्रे तथा वै सवेत् ॥ ३४ ॥
पत्नीवतं द्विजं प्रेतं दहेदौपासनाग्निना । सस्तर्दकामपि प्रेतां न दहेद्वह्निना दहेत् ॥ ३५ ॥ संसृष्टाग्निमपत्नीनां कु
श्चिज्जार्यमितायदि । पर्याकमविभागेन दहेदौपासनाग्निना ॥ ३६ ॥ असंसृष्टाग्निकापत्नीपरिके श्चिद्दिप घते ।
संदहेद्विवन्नांबमंथितेनैववह्निना ॥ ३७ ॥ विधुरं विधवां चैव कुर्याल्लौकिकाग्निना दहेत् । ब्रह्मचारिण एवस्याल्लुषेतः कुर
तोऽथवा ॥ ३८ ॥ उक्तस्याधिक्यपार्श्वोग्निप्रेतस्य दहने बुधैः । चत्वेंधचैव सन्नौसौ द्विजागारानलोऽपि वेत ॥ ३९ ॥ वर्षी सचना
दूपादधश्चैवमत्स्यस्याद्दक्षकस्य चाखनं प्राजुराबाद्धुर्धं दाहं तु वाग्निना ॥ ४० ॥ मंत्राग्निविधिनाचैव दहेदश्र
मणं द्विजं । ब्रह्मीभूतं विनेत्याजुराचार्यः शौनकादयः ॥ ४१ ॥ पतिरादौ मृतः पत्नी काळेनास्मिन्मृता यदि । विपरी
तोऽथवापि स्यात्क्रिया श्चैवोत्सवेत्कथं ॥ ४२ ॥ पानि पूर्वं तयोः कुर्यात् पृथग्वा सा शिळापि च । न वेदहन मेकत्र सर्वमिन्य
पृथक्पृथक् ॥ ४३ ॥ पित्रोश्चेन्मृतयोरेवमेकचित्यां च दग्धयोः । कुर्यादाहौ पितुः कर्म ततो मातुश्च नेत्यकं ॥ ४४ ॥
सवर्णा पातिदाहश्चेत्सर्वं पत्नी विपद्यते । एकचित्यां तयोर्दाहः पश्चाच्चेद्दहनं तं च ॥ ४५ ॥ पतिदाहानलात्

दवी पृथक्

॥३८॥

वेदेहं दन्येनवाग्निना ॥ तदुक्ते भवदैवे केसवर्णमेवस्तूयः ॥४६॥ यदिस्यां दूहनं पत्न्याः पतिदानळं किन ॥
आशौचं पक्षिणी तस्यापतिकार्यादिनंतरं ॥४७॥ तिळांजळिं तथा पिंडां नवश्राद्धादिकं चहि ॥ सर्वं
मासमाप्यपक्षिण्यां षोडशाद्य परेहनि ॥४८॥ असूर्यपाशातयः सर्वे यावत्स्याद स्थिसंचयं ॥ आ
दशाहं सुतश्चैवेडावदंतिमहर्षयः ॥४९॥ यस्य पिंडं स्पृशेत्काकः प्रेतस्य दशमेऽहनि ॥ नतस्ययमना
द्यास्यादिति श्चैवोत्तमा भवेत् ॥५०॥ निधने सहपत्या चेन्नासः पार्श्वे शिळाचितिः ॥ एकं स्याद्दु
मंत्राश्चसर्वमन्यत्पृथक्पृथक् ॥५१॥ तिळांजल्यादिकं कर्म कुर्यात्सपतिपूर्वकं ॥ एकस्मि
न्नेव काळे स्याद्दु भयोरप्यनुक्रमात् ॥५२॥ जननं मरणं वा स्याद्वाळे गर्भहणे यदि ॥ मुतावं
तो पिवेकुर्युः स्नानदानादिकाः क्रियाः ॥५३॥ शकटे शवमारोप्य निन्येत्तद्दहनाळयं ॥ वाह
यित्वाथवा स्कंधे विशाणामितिकेचन ॥५४॥ योवेह ब्राह्मणः प्रेतं मंत्रपूतं द्विजं यदि पदे
पदे श्वमेधस्य फलं भवति निश्चितं ॥५५॥ प्रेतमुद्दिश्य मवै कुर्यात्स्नानान्ये हरहर्द्विजा ॥ तथा
चैवांजळिं दद्यात्तिळोदकसमन्वितं ॥५६॥ स्नानो निघभवेताह बद्धचानां शतानि वै ॥
एवं दशाह मध्ये तु तथैवांजळयोपि च ॥५७॥ वाससश्चोदके चैव पतिपिंडस्तथैव च ॥

॥३८

दशाहे वपनं चैव ब्रह्मचारिणां न हि स्मृतः ॥ पश्चात्पुत्रवानस्तु मापनं स्नानेयत्र तत्वपयः ॥
तत्रैव स्थापयेद्दीपं संस्यवृद्धिं चकारयेत् ॥ ५९ ॥ आदशाहं जलं पिंडं दद्याद्भार्यासुतस्य
च ॥ एवं कुर्याद्विधिपित्रोरन्येषां तु न विद्यते ॥ ६० ॥ पित्रोर्मरणकाले च जन्मकाले सुत
स्य च ॥ तथोपरागकाले स्यात्पुण्यकालाः प्रकीर्तिताः ॥ ६१ ॥ स्नानदानादिकं सर्वं कुर्या
त्तत्रैव हि ॥ अल्पपुण्यं प्रोक्तं मुनिभिस्तत्वदर्शिभिः ॥ ६२ ॥ तिलकं चैव तांबूलं
दानमभ्यंजनं यथा ॥ वर्जयेयुः सपिंडाश्च मृतके मधुराशनं ॥ ६३ ॥ यदि स्यात्पुत्र
कर्तृत्वं कर्मजातस्य कुर्वतः ॥ गुरुर्वा मर्चेस्सद्यः सर्वकर्मततः परं ॥ ६४ ॥ अथै
कस्मिन्दिने कुर्यात्कृत्वा गुरुः सपिंडनं ॥ तिलांजल्यादिकं सर्वं षोडशाद्यपुर
हनि ॥ ६५ ॥ इत्याश्वलायन पैतृमेधिकपरिभाषायां चतुर्दशः ॥ १५ ॥ अ ॥ त्रि
न कर्मेरिसः पुत्रः पित्रोः कुर्यथाविधिः ॥ तदभावे अधिकारी स्यात्सपिंडो वान्य
गोत्रजः ॥ ६६ ॥ यात्येव चैवनु विंडस्यात्शरीरं चौम्तस्य च ॥ आत्म्याद्वाथ देहदेषविधि

पा

क्त

१ ॥ तथा ॥ अस्थिसंचयनात्पूर्वं पुत्रो यदि समागतः ॥ तदादि सर्व १
स्याद्दहनं चस्य तु ॥ दहनादि सपिंड्यंतत्कुर्याज्ज्येष्ठोनुजैः सह ॥ ज्येष्ठश्चेत्संहितौ न स्या
त्कुर्यात्तदनुजोथवा ॥ ६८ ॥ ईषद्दग्धस्त्वथ तस्य तां तथा वा सूत्र समन्वितं ॥ दहेन्मंत्रवि
धानेन नैव नग्नं कदाचन ॥ ६९ ॥ अथमेहनिकं तस्या द्योद द्याद ग्निमौरसः ॥ स
र्वं कुर्यात्सपिंडांतं नान्योन्यं दहनं विना ॥ ७० ॥ सगोत्रो वान्यगोत्रो वा यदि स्त्रीय
दि वा पुमान् ॥ प्रथमेहनि यो दद्यात्स दशाहं समापयेत् ॥ ७१ ॥ अपुत्रस्य मृतस्या

यं विधिरुक्तो महर्षिभिः ॥ दाहश्चैव ततः कुर्यात्पुत्रस्यासंनिधौ न चेत् ॥ ७२ ॥ पुत्रं
विनाग्निदोन्यश्चेदसगोत्रो यदा भवेत् ॥ कुर्याद्दशाहमाशौचं सचापि सपिं

॥२५॥

डवत् ॥ ७३ ॥ पुत्राभावे त्वग्निदः कुर्यात्सर्वं कर्म च ॥ अन्यास्तु अवतोन्यत्रे
हि नादाहास्थिसंचयं ॥ ७४ ॥ अस्थिसंचयनादर्वाग्ज्येष्ठश्चेदागतः सुतः ॥ वासो
दग्धादितः कर्म सर्वं कुर्याद्यथाविधि ॥ ७५ ॥ अस्थिसंचयनादूर्ध्वं ज्येष्ठश्चे
दागतोपि चेत् ॥ कुर्यादग्निमदः पुत्रो दशाहांतं स्वकर्म च ॥ ७७ ॥ सेत्स्वतस्य तु मे
७ ॥ यं कर्म पुत्रः कुर्याद्यथाविधिः ॥ ७ ॥ इति धर्मप्रवृत्तिवचनात् ५

प्रसादि

घो पिंडो येकनामानि येकश्चोप्रपितामहः १ अनेन विधिना श्राद्धं कुर्या

सितुः पितामहस्य च ततस्ततस्पिता चैकं प्रेतश्चैकं विधीयते ॥५॥ त्रयाणामपि पिंडानामे
केनापि सपिंडने । पितृत्वमश्नुते प्रेत इति धर्मो व्यवस्थितः ॥६॥ पितामहस्तथा
चापि विद्यते प्रपितामहः ॥ तृतीयस्यैव ते पिंडास्त्रयो देयाः सपिंडने ॥७॥ प्रेतस्यपि
तरश्चैव विद्यते पित्रयो यदि ॥ षोडश श्राद्धपर्यंतं कुर्यात्सर्वं यथाविधिः च ॥ पितॄणां
मध्यस्य कश्चिन्म्रियते च सपिंडनं ॥ सह कुर्यात्तदा तेन नान्यथा मुनयो विदुः ॥९॥
सपिंडीकरणं न स्याद्वै नोपनयादिकं ॥ अब्दादूर्ध्वं न दृष्यते केचिदाज तु जयार ॥१०॥
निषेधो मनुनिभिः प्रोक्तः सपिंडानामयं च हि ॥ चौलोपनयनादौ च नाधिकारः सुतस्य
तु ॥११॥ यथा पितुस्तथा मातुः सपिंडीकरणे विधिः ॥ अथान्यस्याद पुत्रायाः पत्या
सह सपिंडने ॥१२॥ पुत्रेषु विद्यमानेषु न ततः प्रेतसत्क्रिया ॥ असपिंडः सपिंडो वा
नकुर्यादूहनं विना ॥१३॥ जीवत्स्वेव हि पुत्रेषु प्रेतश्राद्धानि यानि च ॥ स्नेहेन

री वपितामहः ॥ दद्यात्पिंडद्वयं पिन्ये चाथैवं प्रपितामहे २ ॥ प्रथ्यादि कविषय

न१

सं२

॥२७॥

वाथलोभेनकुरुतेन्योवृथाभवेत्॥१४॥येनकेनापिपुत्रेणकृतंचेदौरसेनयत्॥
सपिंडीकरणंचैवशास्त्रंस्यान्मुनयोविदुः॥१५॥पितुःपुत्रेणचैकेनपिंडेयोजने
कृते॥पुनःसंयोजनंतस्यनकुर्यादितरःसुतः॥१६॥येनकेनविनापुत्रेणप्रेतकर्म
कृतंयदि॥पुनःकुर्यात्सुनःसर्वंविनादाहास्थिसंचयं॥१७॥चेद्बालेनहतो
विप्रःषडब्देनैवशुध्यति॥रावंतेनयदिस्पृष्टंसदद्यैनैवशुध्यति॥१८॥रावं
चैवस्पृष्ट्वाद्वौयद्वापिप्रमादतः॥आप्नुयाच्छुद्धिमब्देनवहेद्दैत्रयेणच॥१९॥
प्रायश्चित्तंविधायादौदहेत्प्रेतंयथाविधिः॥अन्यथाकुरुतेयस्तुसचगच्छे
दधोगतिं॥२०॥स्वर्णपर्यंतरिक्षेवाविप्रश्चेन्मृत्युमाप्नुयात्॥तस्यास्तमा
चरेदेवंतेनपूतोभवेत्तदा॥२१॥प्रायश्चित्तंविनायस्तुकुरुतेदहनक्रिया॥
निष्फलंप्रेतकार्यंस्याद्वदंत्येवंमहर्षयः॥२२॥कार्त्तुंचेदस्थिसंस्कारंजमा

॥३७॥

दांनहिशस्यते॥अस्थिशुद्धिकरांमंत्रांपठ्यादर्भानुदीरयेत्॥२३॥दग्धानिवि
धिनास्थीनिभावयित्वाजले क्षिपेत्॥तिलांजल्यादिकंसर्वंकुर्यात्प्रेतस्यकर्म
च॥२४॥साग्निकंसधवांचैवदहेदौपासनाग्निना॥विधुरंविधवांब्रह्मचारि
णंचकुशाग्निना॥२५॥पत्नीवाथपतिर्वास्यादन्यस्यकालेनसंनिधौ॥प्राय
श्चित्तेनसद्योग्निमुत्पाद्यतेनसंदहेत्॥२६॥प्रायश्चित्तविधिर्नोक्तोयत्रस्या
द्दाहकर्मणि॥चतुर्गृहीतेनाज्येनहोमोव्याहृतिभिर्हि॥२७॥दग्धोनारभ्य
गृ
शुक्लोस्यादन्यतऔपासनाहुतीः॥चतुश्चतुस्तिलैःसद्योजुहुयात्तद्दिनावधि॥२८॥
के प्रस्थिताहमारभ्यदग्धावधिंतदाहुतीः॥कृत्वास्यपूर्ववत्कृत्वादहेदौपास
नाग्निना॥२९॥निधनेचसहत्वेनदंपत्योर्गतयोश्चहि॥वासश्चाग्निःशि
क्वचित्तिश्चरुश्चैकोनुमंत्रणं॥३०॥तिलोदकंतथापिंडोनवस्त्राद्यंपृथक्पृथ

कृ॥ अस्थिशुद्धिर्वोत्सर्गश्चैकस्य व नवेद्वयोः॥२१॥ षोडशं च सपिंडं च तथान्
सानुमासिके एकस्मिन्नेव काले तु तयोः कुर्यात्पृथक्पृथक्॥२२॥ नेत्रा सहस्त
नारासहतेन सपिंडनं॥ द्विधावाच्या त्रिधा चैक द्वितायं च त्रिधा तथा॥२३॥ भागं
स्त्रीभ्यथ मान्यिगैः पितृणां सहयोजयेत्॥ स योजये तथा भागान्मातृपिंडैः सहेत
रानु॥२४॥ सपिंडीकरणादूर्ध्वं अमात्पित्रादयस्त्रयः॥ मात्रादयस्तथा तेस्वःश्वा
द्धकर्मेषु चैव हि॥२५॥ सहानुगतयः पित्रोः श्राद्धे चैव क्षयाहके॥ गोवा पाकादिके
चानं तयोः कुर्यात्पृथक्पृथक्॥२६॥ यदि कर्तुं न शक्येत काळातीत भयादपि
अंनमात्रं पृथक्कुर्यादिति वेदविदो विदुः॥२७॥ एकमेव भवेद्वत्र आयश्चित्तं ति
श्वेदकं॥ एकस्मिन्नेव काले तु द्विजस्तु तिपदक्षिणं॥२८॥ विश्वेदेवादि
कं सर्वं मर्चनं च पृथक्पृथक्॥ पितुरादौ ततो मातुः कुर्यात्संकल्पपूर्वकं॥२९॥
अमावास्याष्टका तिस्रः पक्षे कार्ति युगादयः॥ वैधृतिश्च व्यतीपातः स्वा

समं६

हुर्यात् प्रकीर्तितः ॥ ४० ॥ गजच्छायोपरागादि श्रोत्रियागमनं च हि । नवधान्यफलोसन्निरन्यश्च आ
लक्ष्ययोगतः ॥ ४१ ॥ नैमित्तिका इति प्रोक्ताः श्राद्धकाला मनीषिभिः । शाङ्कितः कुरुते श्राद्धं स याति परमां ग
तिं ॥ ४२ ॥ महानदीषु सर्वासु पुण्यतीर्थेषु चैव हि । श्राद्धं विधीयते यत्र नैमित्तिकमुदाहृतं ॥ ४३ ॥ पुत्र
वर्षादिकामेष्टिः स्तन्नकाले विधीयते । पंचमं प्राप्य गर्भस्य वर्षं तौविचैव वार्षिकी ॥ ४४ ॥ नित्यं नैमि
त्तिकं काम्यं यच्च कर्म प्रचोदितं । सूतके मृतके चैव नैव कुर्यात्कदाचन ॥ ४५ ॥ सूतकं मृतकं चैव य
दाशौचं दशाहकं । सपिंडानां [illegible] चैव पुत्रादीनां च संनिधौ ॥ ४६ ॥ त्रिरात्रं पक्षिणी चाहः सद्यश्च
नुवर्तते । स्मृतितस्त्वनुज्ञानीयादितरेषां महर्षिणां ॥ ४७ ॥ दशाहं तावदाशौचं सापिंड्ये नुवर्तते
सर्वेत्र हि धर्मिकाहं स्त्रीस्याः स्नानतः शुचिः ॥ ४८ ॥ पित्रादयस्त्रयश्चैव तथा तस्य च ड्राक्त्रयः ।
सप्तमस्यात्मच पंचैव तथा तस्य च [illegible] ॥ ४९ ॥ न सापिंड्यं बुधैः स्मृतं ॥ ४९ ॥ सापिंड्यं सोदकं
चैव सगोत्रे न च वैकमात्रा । एकैकं सप्तमं चैव सापिंडत्व उदाहृतं ॥ ५० ॥ सपिंडानां यदाशौचं सांनि
धौ स्यादुदाहृतं । दूरस्थं तद्विजानीयाद्देशकालान्तरादपि ॥ ५१ ॥ मासत्रये त्रिरात्रं स्यात्षण्मा

सेपक्षीणी स्ववेदा अहस्तु नवमाद्दर्वाग् ऊर्ध्वं स्नानेन शुध्यति ॥५२॥ पर्वतस्य महानद्या व्यवधाने सवेद्यदि।
त्रिंशद्योजनदूरं वा सद्यः स्नानेन शुध्यति ॥५३॥ द्विदिवीरात्रिरेका च पक्षिणी त्यभिधीयते। अहोरा
त्रमिति प्रोक्तं नैशीकी त्यभिधीयते ॥५४॥ आसायमहरेव स्यात् सद्यस्तत्काल एव च। पत्रवापिऋूने
पित्रोर्मरणदूरतो यथ वा ॥५५॥ सर्वे त्र्याहमाशौचं पुत्राणामेकनिश्चितं। सोदरे सोदरका शौचं स
विज्ञस्याद्दसं निघौ ॥५६॥ अतश्चानुपनीतस्य मृतौ शौचं न हि क्वचित्। दीक्षितस्याहिताग्नेश्च चाध्या
यनिरतस्य च ॥५७॥ रतस्यामंत्रितस्येह नाशौचं विद्यते क्वचित्। संप्रक्षालितपादस्य श्राद्धे विप्रस्य
चैव हि ॥५८॥ गृहानुव्रजपर्यंतं न तस्याशौचमिष्यते। बद्धकंकणस्य विप्रस्य नित्यशोऽसपिंडस्य च ॥५९॥
स्वदारैर्वा स्वनिष्ठस्य नाशौचं विद्यते क्वचित्। क्रियाहीनस्य मूर्खस्य पराधीनस्य नित्यशः ॥६०॥ मी
चसेवारतस्यैव तस्याशौचं न हीयते ॥६१॥ स्वहाचारपरिभ्रष्टो विप्रश्चैव क्षवेद्यदि। कुमर्स्त्रस्टेष्टे स
विज्ञेयो निषिद्धकर्मरतः सदा ॥६२॥ माहिषेयश्च वैकुंठे वृषलेयश्च गोकुलः। निदाघे तैलकेस्यु:
कुंथगुणात्तदुच्यते ॥६३॥ माहिषीत्युच्यते भार्या गर्जेनार्जं तियाधनं। तस्यां वो जायते पुत्रो माहि

॥३७॥

येयनुस्मृताः॥६३॥ रजस्वलाचयाकन्यापरिस्याद्दविवाहिता॥वृषलीवार्षलेयस्याज्ज्ञातस्तस्यांतुचैवहि॥६४॥ विवाहितामसंस्थोगांमोहाच्चेदुद्वहेद्द्विजः॥स्तुगतामुद्वरेत्तांचगोमयेनानुलेपयेत्॥६५॥
स्तत्रषट्त्रांबराहीतिपरित्यस्या॥ल्लिषेचयेत्तांपल्लवैःपंचगव्यैश्चपावमानीभिरेवच॥६६॥ प्रायश्चित्तंविधायाथकूष्मांडहोममाचरेत्॥पुरस्तात्मुद्वहेद्द्विजोविधिवत्सूर्वज्ञापतिः॥६७॥ स्त्तोगात्स्वएवस्याद्कोपिंमुनिभिर्विधिः॥ आयास्त्वायंजपेदन्यः प्रायश्चित्तंपुरःसरं॥६८॥ ऊर्ध्वंचेत्यतिसंयोगाज्ज्ञायते तांपरित्यजेत्॥सनानंचेद्भवेत्तस्यांनिघंस्यात्पतितःपतिः॥६९॥ अज्ञानाचेद्द्विजोवरःविधवामुद्वहेद्यदि॥परित्यज्यतुवैनांचप्रायश्चित्तंसमाचरेत्॥७०॥ अष्टमेकांविधायाहवक्वकीर्णव्रतंचरेत्॥पुत्रश्चेद्भायतेतस्यांरंडगोळकउच्यते॥७१॥ विधवोढासुतश्चैवगोळकःकुंडइत्यथ॥यत्रश्चैवाहिनिंधास्युःसर्वकर्मबहिष्कृताः॥७२॥ संस्कार्यावितियच्चोक्तंमुनिभिःकुंडगोळकौ॥पुणांतरेसधर्मस्यात्कुंडौनिंद्यइतिस्मृतिः॥७३॥ पतिवत्यांसुतःकुंडोव्यभिचारात्समुद्भवः॥गोळकोविधवायांचनिषिद्धस्यात्कुळौस्मृतः॥७४॥ वृषळेयश्चवैकुंडोगोळकश्चद्वयोर्द्विजः॥तजाश्च

(78)

॥४०॥

पिहिनिंघास्युमा। हिषेयोपिविप्रङ्क॥७५॥एभिः सह वसेदेषां याजनं कुरुते यदा। वित्तमेषां द्विजो यस्तु लु
केसोपिहि नरसुक॥७६॥ एतेषां याजनं यस्तु ब्राह्मणः कुरुते यदि। स याति नरकं घोरं यावदिंद्राश्च
तुर्दश॥७७॥ अद्विजानां जलं चान्नं याजनं च प्रतिग्रहं॥ ब्राह्मणो नैव गृह्णीयादिति प्राह मुनी श्वरः॥
॥७८॥ इत्याश्व० धर्मशा० लोकनिंद्यप्रकरणं नाम पंचदशोध्यायः॥१५॥ सर्वेषामेव वर्णानामुत्तमो
ब्राह्मणो गुरुः। क्षत्रस्तु पालयेद्विप्रं विआज्ञाप्रतिपालकः॥७९॥ सेवां चैव तु विप्रस्य शूद्रः कुर्याद्य
थोचितां। सर्वेषां चापि वैश्यो मान्यो वेदविदा एव हि॥८०॥ यज्ञनादीनि कर्माणि कुर्याद्ब्राह्मणो द्विजः। धर्मो
हि द्विजवर्यस्य परमानंददायकः॥८१॥ रणे धीरो भवेत्क्षत्रो जीयाद्राज्यं च वैरिणां। पालयेद्ब्राह्मणा
न्सम्यक्स्वपरं तत्र नैव जायते॥८२॥ शूद्रः कुर्याद्द्विजश्चैव सेवामेव प्रयत्नतः। तथा सुखं तेन लभेत्स्वर्गं
प्रवदंति महर्षयः॥८३॥ ब्राह्मणः क्षत्रियो वापि स्वधर्मेणानुवर्तयेत्। नाचरेत्परमं धर्मं धर्म
नाशाय चात्मनः॥८४॥ स्नानेन कायशुद्धिः स्यादात्मध्यानेन चांतरा। सत्कर्मणा द्विजः शूद्रः
सर्वकर्मसु चैव हि॥८५॥ स्वधर्मनिरतो विप्रः कुरुते पातकं यदि। स्वधर्मेणैव शुध्येत नान्य

॥४०॥

या अशुचितमियां। नस्पृशांती हपापानि ब्राह्मणं वेदपारगं। कदाचित्कुरुते मोहात्स भपत्रे ऊँ ज्ञेयथा॥८७॥
अशुचिं चेत्स्पृशो स्नातः कर्मकाळे कचिद्द्विजः। प्रक्षाल्यांघ्रि राचम्याकर्मकर्तुमथार्हति॥८८॥ तुं सःका
सविकारस्यात्कृतो ध्योवानानिर्गमः। क्लेशो स्रावो भवेत्कर्मकाळे चाचम्य शुध्यति॥८९॥ निर्गतस्या
दृष्यो वायुः कर्मकाळे द्विजस्य चेत्। सद्यश्रो चंद्विराचम्य शिष्टं कर्म समाचरेत्॥९०॥ उदक्यां सूति
कां चैव पतितं चाव मंत्यजं। स्वकाकरासंस्पृष्टा सेवासा जळमाविशेत्॥९१॥ तत्स्पृष्टिं नं स्पृशौ
घस्तु स्नानं तस्य विधीयते। तदूर्ध्वं तु समाचम्य व्यवहारे शुचिस्मृतः॥९२॥ उच्छिष्टस्पर्शनं चे
स्याद्यत्नतो भोजनस्य वा। अन्नपात्रस्थमश्नीयात्स्नात्वा न दद्यात्कंचन॥९३॥ कुरुते व्रतभंगं
यो द्विजस्यैव विशेषतः। स गच्छेन्नरकं चाशु प्रवदंति महर्षयः॥९४॥ देहविद्धिन्नहस्तेन सेवास
र लभते यदि। न तस्य वर्धते धर्मश्रीरायुः क्षीयते ध्रुवं॥९५॥ यस्य कस्य नरो यस्तु कृते तेषु
स्नापितं। द्विजस्येह विशेषेण स च गच्छेदधो गतिं॥९६॥ कुरुते योपमानं च ब्राह्मणस्य वि
शेषतः॥ तस्यायुः क्षीयते नूनं मायुर्लक्ष्मीश्च संगतिः॥९७॥ उच्चासनोपविष्टस्याग्र

स्नानं पुरतोयादि गृह्णेन्ना च पंचन्नतानि ह चामुत्र चैव हि ॥९८॥ परदेवार्चको विप्रस्तद्धीनौ द्वहेद्वदि
मासमेकं तदन्नाशी जीवं भ्रष्टत्वमाप्नुयात् ॥९९॥ अनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमं । स जीवन्नेव
वशूद्रत्वमाशु गच्छति सान्वयः ॥१००॥ संतुष्टो येन केनेह सदाचारपरायणः । पराधीनो द्विजो नस्यात्स
तरेद्भवसागरं ॥१॥ इत्याख्यं धर्मशास्त्रे वर्णधर्मो नाम षोडशः ॥ अथ स्वे वा द्विजः श्राद्धं कुर्यात् श्राद्धं चैव
न नेहनित्यं पार्वणं विधानेनापि तत्परः स उच्यते ॥२॥ होमं कृत्वाथ पर्वेद्युः सायं विप्रान्निमंत्रयेत्
प्रातश्चैवापरेद्युर्वा श्राद्धवेदपारगान् ॥३॥ प्रातरौपासनाग्नेस्तु श्राद्धपाकार्थमुल्मुकं नीत्वा
नं सकलं हुत्वा पुनः समीळयेदग्नौ ॥४॥ ततो मध्याह्निकं स्नानं कृत्वा संध्यामुपास्य च ॥ निमंत्रि
तान्समाहूय क्रमाद्देवपितृद्विजान् ॥५॥ प्राणानायम्य संकल्प्य श्राद्धार्थमनुवारयेत् । कुशा
सतानि हैर्युक्तं जलं पात्रे प्रपूर्य च ॥६॥ आसनश्चैव शुध्यर्थं दद्यास्य च गृहस्य च । द्विजः सह पू
ठेस्तु तं प्रायश्चित्तार्थमेव हि ॥७॥ ननं स्नातं शुचीयोग्निस्तु ब्रतं ततमं श्याहि । उष्णं तस्य यथैतो नु नयो
योमंत्राः क्रमेण तु ॥८॥ किंचिधक्र विदान्यानि स्तन्नाति कथयंति हि । पो रुषं चास्य वामस्यम

॥४२॥

॥४२॥

मार्गेतेव चेद्दत्यथ ॥ ९ ॥ सौम्यं च वैष्णवीं रौद्रं पावमान्यमथापि वा । अग्निसूक्तं पावमानी त्रिज-
ळं चैवाभिमंत्रयेत् ॥ १० ॥ आज्यहोमप्रयोगं कुर्याद्व्यं अपक्वं पक्वमेव च । सर्वं चैव समभ्यर्च्य विष्णुं तक्षे
न प्रोक्षयेद्गृहं ॥ ११ ॥ ततः स्नानं स्वयत्नात्त्रिप्रास्त मस्तेति पठन्नमेत् । पुरतः श्राद्धं यत्र षोडशं हिरण्यं स
कुशं च हि ॥ १२ ॥ ततः प्राणायाम पसव्येन श्राद्धं कर्तुम्पितुर्मम । आचम्य स्वस्ति पठ्याथ दद्यात्सं
कल्प्य वै क्षणं ॥ १३ ॥ देवानां क्षालयेत्पादौ मंडळे चतुरस्रके । पितृणां वर्तुळं चैव प्रांगणे रावि हि
पके ॥ १४ ॥ इत्यन्नेत्वा व मेलकं नहि व्याजा च्यम थोन्नरे । पितरश्च पवित्राणि स्वस्वस्थाने स्थितेद्दथ ॥ १५ ॥
आचाम्य गृहमागत्य ब्राह्मणानुपवेशयेत् । प्राङ्मुखौ द्वावुदङ्मुखं स्त्रीं प्राकस्त्वी स्त्रीनुदङ्मुखा
न ॥ १६ ॥ निरस्य भस्मा किरेद्वायुं तिळान्निर्झीति कोणतः । पठन्नपहतामंत्रमपसव्येन चाप्सु ॥ १७ ॥
पितृणाम्पुरतः सिंचेज्जलं पठन्नुदीरतां । सव्येन पुरतो दैवे गायत्र्या चैवमेव हि ॥ १८ ॥ आहूय
देवानामासनं दत्वा क्षणं चावाहयेदथ । कुशाद्दिरासि देवानां विश्वेदेवास इत्यृचा ॥ २० ॥ वि

घेद्देवास्स्सक्मंत्रमुच्चार्यप्रोक्षयद्भुवं॥अर्घ्यार्थं चासादयेद्धपात्रे दैवेकुशान्विते॥२१॥आगच्छंतुम
हाभागाविश्वेदेवामहाबलाः॥यत्रयत्राविहिता श्राद्धेसावधानासवन्तुते॥२२॥पूर्वाग्रेदैविके
पात्रेदक्षिणाग्राणिपैतृके॥अधश्चोपरि पात्राणांकुशांदैवेचपैतृके॥२३॥गायत्र्याप्रोक्षयो
न्यांचिकृत्वो त्रानेक्षिपेघवान्॥शन्नोदेवीरनेनापःपूरइत्वाक्षिपेद्यवान्॥२४॥यवोसिधा
न्यराजोवावारुणोमधुसंयुतः॥निर्णोदः सर्वपापानांम्यावित्रमृषिभिस्स्मृतं॥२५॥गंधाक्ष
तकुशांश्चैवक्षिपेदर्घ्यंनिवेदयेत्॥यादिव्याइतिमंत्रेनतस्तेहस्तम्पिधापयेत्॥२६॥निदध्यादर्
घ्यपात्रेतुदेवानामग्निसंमुखे॥पितृणामर्घ्यपात्राणि तानिवैपितृसंमुखे॥२७॥देवौचार्चादक्षिणा
दिस्यापादंज्ञान्वंसमद्देसु॥त्रिरोंसज्ञानुपादेषुवामांगादिषुपैतृके॥२८॥अर्चतानेनमंत्रे ॥४२॥
णगंधादिभिरथाचयेत्॥युवासुवासामंत्रेणदधादाछादनंततः॥२९॥यथोविधिना
देवासमभ्यर्च्यतथाग्नयः॥पितृणामर्चनंकुर्यादपसव्येनचैवहि॥३०॥आसनंच
क्षणंदद्यापितृनावाहयेदथ॥उशंतस्त्वेतिमंत्रेणप्रतिपितरमित्यथ॥३१॥आयन्तु

॥४२॥

नइमम्मंत्रमुच्चरेत्सरुदेवहीसव्येनप्रोक्षगायत्र्यापात्राण्युत्तानिकारयेत्॥३२॥क्षिप्त्वातिक
नपःस्पर्यशान्नोदेवीसमुच्चरेत्।पुस्तेषुचपात्रेषुतिलोसीत्यावपेत्तिलान्॥३३॥गंधपुष्पकु
शादीनिक्षिप्त्वाचैवतुपूर्ववत्।स्वधार्घ्याइतितंब्रूयात्त्रिसव्येननिवेदयेत्॥३४॥सव्यह
स्तगृहीतेनतुपाणिनादक्षिणेनतुदद्यात्पितरिदत्तेर्घ्यंपादिव्यामन्त्रमुच्चरेत्॥३५॥ए
वंपितामहेचैवतथैवप्रपितामहेदत्वार्घ्यंसलिलन्दद्यात्पुनस्त्रीषुकरेषुच॥३६॥पात्र
द्वयगतन्तोयंपित्रपात्रेप्रसिच्यच।पात्रस्थंपुत्रकामीचेन्मुखन्तदनुलेपयेत्॥३७॥पि
तृभ्यस्थानमसीतिन्युब्जंचोत्तानमेवचात्तीपयन्निहितन्कुर्याद्दुत्तानोपरिभाजनं
॥३८॥स्थापितम्प्रथमम्पात्रन्तुस्थानान्नहिचालयेत्।जलसेचनपर्यन्तम्पिण्डाना
म्पुरतश्चहि॥३९॥पितृपाणिविधौपोद्यद्यात्पसव्येनवैततः॥नमोवइतिमन्त्रेणपि
